(1058) "पेल्ट गतौ" (I-भ्वादिः-541. सक. सेट्. आत्म.)

पेलकः-लिका, पेलकः-लिका, पिपेलिषकः-षिका, पेपेलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। पेला मुक्तसमुज्झितम्। पेलकः=त्वग्गन्धः। पेलवम्=तनु। औणादिकोऽयम्।

(1059) "पेवृ सेवने" (I-भ्वादिः-504. सक. सेट्. आत्म.)

'—सेचने' इति मैत्रेयः। क्षीरस्वामिमैत्रेयादीनां मतेनास्य पाठः। पेवकः-विका, पेवकः-विका, पिपेविषकः-षिका, पेपेवकः-विका ; इत्यादीनि सर्वाणि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। अस्य धातोः आत्मनेपदित्वात् शानचि-पेवमानः, पेविष्यमाणः, पिपेविषमाणः, पिपेविषिष्यमाणः, इतीमान्यधिकानीति विशेषः।

(1060) "पेषृ प्रयत्ने" (I-भ्वादिः-615.अक. सेट्. आत्म.)

'एषृ—' इति धातोः पाठान्तरमिदम्।

पेषकः-षिका, पेषकः-षिका, पिपेषिषकः-षिका, पेपेषकः-षिका ; इत्यादीनि रूपाणि भौवादिकगेपतिवत् (429) ज्ञेयानि। क्विपि तु [1]पेट्-पेड्-पेषौ-पेषः इति रूपम्। कर्तरि क्तप्रत्यये अपेषितम्[A] इति।

(1061) "पेसृ गतौ" (I-भ्वादिः-720. सक. सेट्. पर.)

'णौ पिंसयति भाषार्थे, गत्यां तु शपि पेसति।' (श्लो. 192) इति देवः।

पेसकः-सिका, पेसकः-सिका, पिपेसिषकः-षिका, पेपेसकः-सिका ;

पेसिता-त्री, पेसयिता-त्री, पिपेसिषिता-त्री, पेपेसिता-त्री ;

पेसन्-न्ती, पेसयन्-न्ती, पिपेसिषन्-न्ती ; —

पेसिष्यन्, पेसयिष्यन्-न्ती-ती, पिपेसिषिष्यन्-न्ती-ती ; —

— पेसयमानः, पेसयिष्यमाणः, — पेपेस्यमानः, पेपेसिष्यमाणः ;

पेः-पेसौ-पेसः ; — — —

पेसः, पेसः, पिपेसिषुः, पेपेसः ;

पेसितव्यम्, पेसयितव्यम्, पिपेसिषितव्यम्, पेपेसितव्यम् ;

---

1. 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वे चर्त्वविकल्पे च रूपमेवम्।

A. 'येषणात्तहरिजेषसंभ्रमात्रेषितस्मृतिरपेषितो रथात्॥' धा. का. 1.78.